श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षड्सप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षट्सप्ततितमं दशकम् ॥

## उद्धवदूत्यवर्णनम्

गत्वा सान्दीपनिमथ चतुष्षष्टिमात्रैरहोभिः
    सर्वज्ञस्त्वं सह मुसलिना सर्वविद्या गृहीत्वा।
पुत्रं नष्टं यमनिलयनादाहृतं दक्षिणार्थं
    दत्वा तस्मै निजपुरमगा नादयन् पाञ्चजन्यम् ॥ **76.1** ॥

स्मृत्वा स्मृत्वा पशुपसुदृशः प्रेमभारप्रणुन्नाः
    कारुण्येन त्वमपि विवशः प्राहिणोरुद्धवं तम्।
किञ्चामुष्मै परमसुहृदे भक्तवर्याय तासां
    भक्त्युद्रेकं सकलभुवने दुर्लभं दर्शयिष्यन् ॥ **76.2** ॥

त्वन्माहात्म्यप्रथिमपिशुनं गोकुलं प्राप्य सायं
    त्वद्वार्ताभिर्बहु स रमयामास नन्दं यशोदाम्।
प्रातर्दृष्ट्वा मणिमयरथं शङ्किताः पङ्कजाक्ष्यः
    श्रुत्वा प्राप्तं भवदनुचरं त्यक्तकार्याः समीयुः ॥ **76.3** ॥

दृष्ट्वा चैनं त्वदुपमलसद्वेषभूषाभिरामं
    स्मृत्वा स्मृत्वा तव विलसितान्युच्चकैस्तानि तानि।
रुद्धालापाः कथमपि पुनर्गद्गदां वाचमूचुः
    सौजन्यादीन् निजपरभिदामप्यलं विस्मरन्त्यः ॥ **76.4** ॥

श्रीमन् किं त्वं पितृजनकृते प्रेषितो निर्दयेन
    क्वासौ कान्तो नगरसुदृशां हा हरे नाथ पायाः।

आश्लेषाणाममृतवपुषो हन्त ते चुम्बनाना -
मुन्मादानां कुहकवचसां विस्मरेत् कान्त का वा ॥ **76.5** ॥

रासक्रीडालुलितललितं विश्लथत्केशपाशं
मन्दोद्भिन्नश्रमजलकणं लोभनीयं त्वदङ्गम्।
कारुण्याब्धे सकृदपि समालिङ्गितुं दर्शयेति
प्रेमोन्मादाद्भुवनमदन त्वत्प्रियास्त्वां विलेपुः ॥ **76.6** ॥

एवम्प्रायैर्विवशवचनैराकुला गोपिकास्ता -
स्त्वत्सन्देशैः प्रकृतिमनयत् सोऽथ विज्ञानगर्भैः।
भूयस्ताभिर्मुदितमतिभिस्त्वन्मयीभिर्वधूभि -
स्तत्तद्वार्तासरसमनयत् कानिचिद्वासराणि ॥ **76.7** ॥

त्वत्प्रोद्गानैः सहितमनिशं सर्वतो गेहकृत्यं
त्वद्वार्तैव प्रसरति मिथः सैव चोत्स्वापलापाः।
चेष्टाः प्रायस्त्वदनुकृतयस्त्वन्मयं सर्वमेवं
दृष्ट्वा तत्र व्यमुहदधिकं विस्मयादुद्धवोऽयम् ॥ **76.8** ॥

राधाया मे प्रियतममिदं मत्प्रियैवं ब्रवीति
त्वं किं मौनं कलयसि सखे मानिनी मत्प्रियेव।
इत्याद्येव प्रवदति सखि त्वत्प्रियो निर्जने मा -
मित्थंवादैररमयदयं त्वत्प्रियामुत्पलाक्षीम् ॥ **76.9** ॥

एष्यामि द्रागनुपगमनं केवलं कार्यभारा -
द्विश्लेषेऽपि स्मरणदृढतासम्भवान्मास्तु खेदः।
ब्रह्मानन्दे मिलति नचिरात् सङ्गमो वा वियोग -
स्तुल्यो वः स्यादिति तव गिरा सोऽकरोन्निर्व्यथास्ताः ॥ **76.10** ॥

एवं भक्तिः सकलभुवने नेक्षिता न श्रुता वा
    किं शास्त्रौघैः किमिह तपसा गोपिकाभ्यो नमोऽस्तु।
इत्यानन्दाकुलमुपगतं गोकुलादुद्धवं तं
    दृष्ट्वा हृष्टो गुरुपुरपते पाहि मामामयौघात्॥ **76.11** ॥

॥ इति श्रीमन्नारायणीये षट्सप्ततितमं दशकं समाप्तम्॥